# Shri Ganesha Stotram Shivadattakritam

# શિવદત્તકૃતં શ્રીગણેશસ્તોત્રમ્

## Document Information

Text title : Shri Ganesha Stotram Shivadattakritam

File name : gaNeshastotramshivadattakRRitaM.itx

Category : ganesha, mudgalapurANa, stotra, dvAdasha

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM aShTamaH khaNDaH | adhyAyaH 29 | 8.29 40-60||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om


This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.


June 4, 2024

*sanskritdocuments.org*

# શિવદત્તકૃતં શ્રીગણેશસ્તોત્રમ્

॥ શ્રીગણેશાય નમઃ ॥
શિવદત્ત ઉવાચ ।
ગણેશાય નમસ્તુભ્યં પરાશરાત્મજાય તે ।
શિવપુત્રાય શેષસ્ય પુત્રાય વૈ નમો નમઃ ॥ ૪૦॥
સર્વપુત્રાય સર્વેષાં માત્રે પિત્રે નમો નમઃ ।
ભ્રાત્રે સુહૃદ્ગણાયૈવ સ્નુષાદિવેષધારિણે ॥ ૪૧॥
અનન્તરૂપિણે તુભ્યં નાનાભોગવિહારિણે ।
ભોગહીનાય દેવાય સુરાય તે નમો નમઃ ॥ ૪૨॥
અપારગુણધારાય ગુણાનાં પતયે નમઃ ।
ગણેશાય પરેશાય પૂર્ણાનન્દાય તે નમઃ ॥ ૪૩॥
આદિમધ્યાન્તરૂપૈશ્ચ સ્રષ્ટ્રે પાત્રે પ્રહારિણે ।
આદિમધ્યાન્તહીનાય સાક્ષિણે તે નમો નમઃ ॥ ૪૪॥
સ્વાનન્દપતયે તુભ્યં મૂષકવાહનાય ચ ।
સિદ્ધિબુદ્ધિપ્રદાત્રે તે સિદ્ધિબુદ્ધિપતે નમઃ ॥ ૪૫॥
યોગાનાં પતયે તુભ્યં યોગશાન્તિસ્વરૂપિણે ।
ગજાનનાય શાન્તિભ્યઃ શાન્તિદાત્રે નમો નમઃ ॥ ૪૬॥
પરેશાય મહાદીનપાલકાય નમો નમઃ ।
સર્વેભ્યઃ સુખદાત્રે તે વિઘ્નેશાય નમો નમઃ ॥ ૪૭॥
કિં સ્તૌમિ ત્વાં ગણાધ્યક્ષ વેદાઃ શાન્તિં ગતાસ્ત્વયિ ।
અતો નમો નમો નાથ તુષ્ટો ભવ મહોદર ॥ ૪૮॥
રજાંસિ સ્વસ્થિતાસ્તારા મેઘબિન્દૂંશ્ચ માનવઃ ।
ગણયેત્ કોઽપિ તે નાથ ન ગુણાન્ વર્ણિતું ક્ષમઃ ॥ ૪૯॥
ધન્યોઽહં સર્વભાવૈશ્ચ યેન દૃષ્ટો ગજાનનઃ ।
વેદાન્તાગોચરે ગમ્યો યોગિભિશ્ચ શિવાદિભિઃ ॥ ૫૦॥
એવં સ્તુત્વા ગણેશાનં નનામ મુનિપુઙ્ગવઃ ।

તમુવાચ ગણાધીશઃ સ્વભક્તં ભક્તલોલુપઃ ॥ ૫૧॥
શ્રીગણેશ ઉવાચ ।
વરાન્ વૃણુ મહાભાગ યે તે ચિત્તે દદામિ તાન્ ।
પ્રસન્નોઽહં ચ તે ભક્ત્યા સ્તોત્રેણ મુનિસત્તમ ॥ ૫૨॥
શિવદત્ત ઉવાચ ।
ભક્તિં દેહિ ત્વદીયાં મે દૃઢામવ્યભિચારિણીમ્ ।
નાન્યં યાચે ગણાધીશ ત્વત્પાદપ્રવણો હ્યહમ્ ॥ ૫૩॥
(ફલશ્રુતિઃ)
શ્રીગણેશ ઉવાચ ।
મદીયા ભક્તિરુગ્રા તે ભવિષ્યતિ મહામતે ।
સ્મૃતિમાત્રેણ તે કાર્યં ભવિષ્યતિ સુસિદ્ધિદમ્ ॥ ૫૪॥
ત્વયા કૃતમિદં સ્તોત્રં મદીયં પઠનાન્નૃણામ્ ।
શ્રવણાત્ સિદ્ધિદં સર્વં ભવિષ્યતિ નિરન્તરમ્ ॥ ૫૫॥
યદ્યદિચ્છતિ તત્તત્તુ સફલં પ્રભવિષ્યતિ ।
સ્તોત્રપાઠેન વિપ્રર્ષે મયિ ભક્તિપ્રદં તથા ॥ ૫૬॥
એવમુક્ત્વાંઽતર્દધેઽસૌ ગણેશો બ્રહ્મનાયકઃ ।
શિવદત્તો ગણેશાનં સઞ્ચિન્ત્ય સ્વાશ્રમે સ્થિતઃ ॥ ૫૭॥
સદા યોગીન્દ્રવન્દ્યઃ સ બભૂવે ગાણપાગ્રણીઃ ।
અન્તે વિઘ્નેશ્વરે યોગી લીનો બભૂવ શૌનક ॥ ૫૮॥
એવં વૈશાખજં મુખ્યં વ્રતં સર્વાર્થદં પરમ્ ।
કથિતં તે મહાભાગ શ્રવણાત્ સર્વસિદ્ધિદમ્ ॥ ૫૯॥
વૈશાખવ્રતસંયુક્તં શિવદત્તચરિત્રકમ્ ।
યઃ પઠેચ્છૃણુયાદ્ વાઽપિ સ સર્વફલભાગ્ભવેત્ ॥ ૬૦॥

ઇતિ શિવદત્તકૃતં શ્રીગણેશસ્તોત્રં સમ્પૂર્ણમ્ ॥
દ્વાદશસ્તોત્રમ્
- ॥ મુદ્ગલપુરાણં અષ્ટમઃ ખણ્ડઃ । અધ્યાયઃ ૨૯ । ૮.૨૯ ૪૦-૬૦ ॥

- .. mudgalapurANaM aShTamaH khaNDaH . adhyAyaH 29 . 8.29 40-60..

Proofread by Yash Khasbage, Preeti Bhandare

*Shri Ganesha Stotram Shivadattakritam*

pdf was typeset on June 4, 2024

Please send corrections to *sanskrit@cheerful.com*